किं विशिष्टे वंशे। भुवनविदिते। भुवने त्रिभुवने विदितो विख्यातो भुवनविदितस्तस्मिन्॥ किं विशिष्टं त्वां भवंतं। मघोनः शक्रस्य इंद्रस्य प्रकृतिपु
रुषं। प्रधानपुरुषं अमात्यपुरुषं। अत एव इंद्रो वै वर्षतीति वेदवाक्यं प्रवर्त्तते। पुनः किंभूतं त्वां भवंतं। कामरूपं। कामं रूपं धारयतीति तथोक्तः मनो इच्छे स्वेच्छारूपं
दं अत एव पुष्कमे धीतिसंततानि विवक्षमाणाम नु गुणस्पात। विस्वोपकारिणां मेघानां कुले प्रसूतं तेन कारणेन त्वयि अर्थित्वं याचकत्वं मम दैवगत
कं गं तो दं। दूरबंधुः दूरे बंधुर्नार्यार्यस्य स दूरबंधुः विप्रकृष्टभार्यः प्रस्थावादत्र बंधुशब्देन कलत्रमेवाग्र ह्यते। कस्मात् विधिवशात् दैवपारतं
त्र्यात्। अथवा बंधुर्बंधुजनः यदि कश्चित् स्वजनोऽपि समीपवर्त्ती भवति। तदा तमव योजयामि। परं दैवाद्देक एवाहमत्र तेन त्वां याचयामी तथोक्तः न चेत
द्युक्तं। यत अधिगुणे गुणाधिके पुंसि याच्ञा ताप्रार्थना मोघापि निष्फलापि वरं श्रेष्ठा प्रवर्त्तते। अधमे नीचे तुलब्धकामापि लब्धसार्थापि न व
रं मेघा इति अमोघा अपि वरं। लब्धकामापि न वरमिति कोऽर्थः। यद्यधिकगुणा प्रार्थिता न ददाति। तदा स्वयं वचनीयता। न चापि तुरधमात् लब्धकामो
पि याचको निंद्यत एवार्थांतरन्यासोऽलंकारः॥६ संतप्तानां त्वमसि शरणमित्यादि॥ यत्र्पदो नित्यसंबंध इति यत् यस्मात् कारणात् संतप्तानां
पुरुषाणां त्वं शरणमसि भवजनं व्याधिस्तपकमन्येषामपि। पर्वतवृक्षादीनां दैवदहनदह्यमानानां त्वमेव निर्वापयिता। अहमपि वि
रहसंतप्तोऽस्मि। तत्तस्मात् कारणात् हे पयोद हे मेघ मे मम प्रियायाः संदेशं हर नय प्रापय। स्वयमगमने कारणमाह॥ किं विशिष्टस्य मे मम
धनपतिक्रोधविश्लेषितस्य। धनपतेः धनदस्य यो ऽसौ क्रोधः तेन धनपतिक्रोधेन विश्लेषितो वियोजितः धनपतिक्रोधविश्लेषितस्तस्य॥ हे
मेघ ते त्वया यक्षेश्वराणां अलका नाम वसतिः गंतव्या यातव्या। किं विशिष्टा अलका नाम। बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या। अ
नेन नित्यं निवासी सकलजनप्रसिद्धो उद्यानः तत्र तिष्ठति तदीयशिरश्चंद्रिकया धौतानि तम्मश्चिनी स्वापि निरस्तत मोमलादि हर्म्याणि यस्याः सा

2

×गमनायसंवादय। आ ऊ. दर्वि: पक्षिरालिंगनादिना। आवंदनार्थः ×६ ×रामचरणैः ×७ ×स्वकलेवत्वंतंयां भलोसयन्नाह ×९

×स्नवतस्सवस्नेहव्यक्तिर्भवति जायते। किंरुवा संयोगे मेलापके एलक्षाप्य। सवतः किंकुर्वतः उष्णं तप्तं बाष्पं निश्वासं मुंचतः उष्मतः किंः दाणं चिरविरहजं। चिरकालवियोगाज्जातं उष्णं। मित्रत्वं वपरस्परोपकारोऽप

×किंविशिष्टाय उच्चदीनालस्कां ताः उत्कृष्टं यदीनयुलका कुटिलकेशाप यन्तायकालिः पथिकव° ×२

तथा अनेनचात्तिङ्गानकथनंश्वानादीश्वरदर्शनलासप्रलासनंचव्यज्यते। अत्र हेतुरलंकारः॥७ त्वामारूढंपवनपदवीमित्यादि॥ हेवारिद
त्वां नवंतं पवनपदवीं गमनमारूढं पथिकवनिताः प्रेक्षिष्यंते। आलोकयिष्यंते॥ ताः किंकुर्वंत्यः आस्वसंत्यः स्वस्थीभवंत्यः कस्मात् प्रत्ययात् निश्चयात् अत्र
वर्षं मेघागमे प्रियः प्रत्यागच्छति। उक्तंनेकार्थे प्रत्ययो विश्वाससपथज्ञाननिश्चयाधिष्वित्यतः कथंभूताः तिधाराः अपि त्वयि सन्नद्धे श्युणितसुरधनुस्तडित्व
तागर्जितादि सामग्रीके विरहविधुरां वियोगाकुलां प्रेयसीं उपेक्षेत। विरहयेत। यदि मादृशोऽन्योऽपि पराधीनो न स्यात्। स्वाधीना द्विकांतात्तिः सद्दृ रमपा
णात्राद्दृषमतिवाहयंति। सत्र द्वादयं आद्यापवमादीपधारिकाः अत्र व्यतिरेकोऽलंकारः॥८ आपृच्छस्व प्रियसखममुमित्यादि॥ इदानीं प्रायेणोपतेदेशनामह

×रामगिरिं ×६

॥हेमेघ अमुं शैलं पर्वतं चित्रकूटं आपृच्छस्व मुकलापय। किंविशिष्टं अमुं पर्वतं। प्रियसखं प्रियश्चासौ सखाच सत्तथा तं। इष्टमित्रं॥ पुनः कथंभूतं। तुं
गं उच्चैस्तरं पुनः किंविशिष्टं शैलं मेखलासु नितंबप्रदेशेषु रघुपतिपदैः रामपादप्रतिविंवितैः रंकितं चिह्नितं। अनेकार्थः पद स्थानेवाक्ये पादेपदे वि
केत्यादि॥ किंभूतैः रघुपतिपदैः पुंसां पुरुषाणां वंद्यैः नमस्काराहैंः इतियावनोक्तिः यस्याईकाले रसर्वस्मिन्समागमसमये (काल) त्वया सह संयोगमेत्य
चिरविरहजं बाष्पमूष्माणं त्यजतः स्नेहव्यक्तिर्भवति स्निग्धतत्त्वार्थः पर्वतादिजलदवृष्ट्या स्निग्धास्तवंति। एतदेव सखित्वं यच्चिरेण सुहृदि दृ
ष्ट्वा बाष्पस्नेहो जायते। अथवा अन्योऽपि यः किल चिरविरहदुःखितो भवति। तत्संयोगे सति उष्णं बाष्पं अश्रुं मुंचति। संयोगमेत्येति बाष्पमोक्षापे
क्षं पौर्वकाल्यं स्नेहक्रियापेक्षं वा नत्वंवमेकाकी तुल्य न तु विष्यतीति शुद्धनिमित्तकथनेनोत्साहयन्नाह॥ मंदंमंदंनुदतिपवनः॥ हे घन यथा पवनो
नुकूलः त्वां नवंतं मंदं रतुदति प्रेरयति। इष्टानुगामी मृदुकूलो गतिश्वानुकूलोऽतिधीयते। च समुच्चये नकेवलं वायुर्नुदति। तथा चातको बप्पी
हकः मधुरं अदीमस्वरं यथास्यादेवं तथानदतिशब्दायते। किंविशिष्टः चातकः वामः वामतारा श्रितः पुनः किंभूत चातकः स्तोयग्रत्नुःक्षुः तोयात्ति
लाषुकः एवंविधः पवनः पक्षीत्वगमने शुभः इति शकुनविनया॥ नूनं निश्चितं नवंतं त्वां खेआकाशेवलाकाः हिसकं विकाः सेविष्यंते। किंविशि
ष्टाः बलाकाः आबद्धमालाः रचितपंक्तयः अथवा आबद्धमालारचितपंक्तयः कुसुममौक्तिकादिदामतारिण्यः पतिमत्तिसरंत्यपराविघतापदर्शिनर
इत्युत्प्रेक्षा। कथंभूतं तं नवंतं। नयनसुभगं दर्शनीयं। कस्मात् गर्भाधानक्षणपरिचयात् गर्भस्याधानं धारणं तदेव क्षणः उत्सवस्तेन परिचयस्तस्मा

नितंबस्थलेषु ×७

×पुंसामिति लीकर्तृरिषष्ठी इति रिखं वैः ए तेनास्मदाषु रूप से वितवेन उत्साहयन्नाह हे मेघ पस्यति पर्वतस्य ×८

करकलोवापस्कः प्रवहणानां श्रीधर लूषरोः सप्रवहणा वसुइव्य पया दालत्ताः द्विलंपद्वि हवः इसपालं मिषः मयुहर दं ×८

×अतीष्टमित्रं ×८ अतिमतमित्रं ×८

×वस्तादेवस्तादे ×

मेघदूतटी०

ताइति स्त्रंगर्भाधानोत्सवो नवदागमे तासां भवतीति । चिरपरिचयात् गर्भाधानं च मदहेतुलाभान्महान् उत्सवः यस्य समागमे महोत्सवो भवति को
नाम तस्य सेवां न कुर्यादिति । अत्रानुमानमलंकारः ॥ १० ॥ तां चावश्यमिति । च शब्दः समुच्चये । न केवलं मार्गे बलाकास्त्वां सेविष्यन्ते । तथा एतद्
तावादेव शकुनसद्भावात् अविहतगतेः अवन्ध्यकोपादिति अस्खलितगमनस्त्वं भ्रातृजायां अवश्यं निश्चितं द्रक्ष्यसि । अवलोकयिष्यसि
भ्रातृजायेति त्वं मदीयो बंधुरिति प्रकारान्तरेण ग्रहणाय वचनं । कथंभूतां तां । साध्वीं एकपत्नीं एकतार्थं पुनः किं विशिष्टां दिवसगणनातत्प
रां एतावन्तो दिवसा गता एतावन्ति अवशिष्यन्ते चेति तथा अव्यापन्नां जीवन्ती । एतेषां त्रयाणामपि विशेषणानां कार्यकारणभावः यत एव पत्नी ततो दिव
सान् गणयति यं च कंचन नास्ति अत्र एव जीवन्तीति अमुमेवार्थं द्रढयति । हि यस्मात् आशाबंधः वांछितार्थप्राप्तिसंभावनाबंधे अनेनेति संबं
धः आशाबंधः कर्ता अंगनानां हृदयं कुसुमसदृशं कुसुमसुकुमारं प्रायेण विप्रयोगे सति सद्यःपाति तत्कालमेव पततप्रायः स्त्रोबा
हुल्येन रूणद्धि विरहदुःखितं मरणाध्यवसायात् निवारयतीत्यर्थः अप्यतः पि पतत् रजादिबंधनेर्धार्यते इत्युक्तिलेशः केचित् सद्यःपातिवृण
यतीति एवं तितत्र संगतं अत्रानुमानमलंकारः ॥ ११ ॥ कर्तुं यच्चेति । हे मेघ एकाकिनः किल मार्गे गमनमसांप्रतमिति सहायसंपत्तिं दर्शयन्नाह ॥
भवतो नव राजहंसाः अभिहिताः पक्षिणः रूपा एवरणावहनाः सहायाः संपत्स्यन्ते । अत्रेसरा न भविष्यंति । राजपद विशेषणेन अमीषां उत्तमवंशभृति
यादितं उत्तमस्य सहसंग श्रेयान् । कथंभूता पुनः पक्षिणः सहायकत्वेन उपपन्नाः । वंगगनगतिस्ते पिंगगनगामिनो अत एवाद्य सहायसोबुकाः हंसाः ते
कस्मात् सहायिकत्वेनोपात्ताः सन्तः । त्वं च जलधरस्त्वेव जलरसविनः इति समानशीलव्यसनिनां सख्यं समाख्यातं न तु भिःपाथेयानां पथिकानां ॥
त्वं च निराकरणे तन्निराशार्थं कथयति । बिसकिसलयच्छेद इत्यादि ॥ बिसानां मृणालानां किसलयानि अग्राणि तेषां छेदाः खंडानि तान्येव पाथे
यं पथि हितं संबलं येषां मिति । परिचयमात्रेण अमी मया सह कति वा दूरं गमिष्यंतीत्युक्तं ॥ आकैलासमिति । कैलासं यावत् कथंभूता हं
साः मानसोत्काः प्रावृषि विरला मानसं सरोनुसरन्तीति प्रसिद्धिः अमीषां उत्कलिकायामपि किं कारणं इत्याह ॥ तव तच्छ्रवणसुभगं गर्जितं श्रुत्वा ।
कीदृशं गर्जितं । यन्महीं च वसुंधरां मण्डितशिलींध्रातपत्रां कर्तुं प्रभवति । उद्भूतानि शिलींध्राणि भूमिस्फोटानि तान्येवातपत्राणि

नडेन द्रुवरं
ड्सर्दः ४०
खद्येमेघ ४८

यस्याः। एतेन मेघस्य श्लाघा॥ यस्य शब्दमात्रमपि वसुंधरायाः एवंविधां संपदमादधाति। तस्य व्यापारे किं न विधास्यतीति। चकारः क्रियासमुच्चये न केवलं
मरालाननुकंवयति। मही एवंविधां च विधत्ते॥ १२ मार्गं तावदित्यादि॥ हे जलद तावत्तावत् शब्दः क्रमसूचकः मे मम कथयतः गदतः सतः मार्गं पंथानं
शृणु आकर्णय। येन पथा त्वं गमिष्यसि। तं मार्गं शृणु॥ किंविशिष्टं मार्गं त्वत्प्रयाणानुरूपं त्वद्गमनयोग्यं। हे जलद तदनु पश्चात् मार्गश्रवणादनु
पश्चात् मे मम संदेशं श्रोष्यसि निशामयिष्यसि। किंविशिष्टं संदेशं श्रोत्रपेयं आदरश्रवणीयं श्रवणसुखदमित्यर्थः। हे जलद त्वं खिन्नः सन् यत्र
यस्मिन् मार्गे खिन्नः खिन्नः सन् खेदितः खेदितः सन् गंता आसियाना असि। किं कृत्वा शिखरिषु पर्वतेषु पदं स्थानं न्यस्य। अन्योपि पथिकः खिन्नः सन् शिख
रिषु पर्वतेषु वृक्षेषु वा पदं स्थानं निवेश्य तद्वत्त्वं। पुनः किं कृत्वा क्षीणः क्षीणः सन् उपभुनः स्रोतसां निर्झराणां नदीनां पयो जलं उपभुज्य पीत्वा॥ किंविशि
ष्टं पयः परिलघु निर्मलत्वाल्लाघवोपेतं। अन्योपि पथाक्षीणः श्रांतो जलं पिबति। स्रोतो शब्दोऽत्र शब्दवाची। न तु नदी पर्यायः॥ १३ अद्रेः शृंगमित्या
दि॥ इतः अस्मात् स्थानात् रामगिरिलक्षणात् देशात् उत्पत त्वं गच्छ। कथं आकाशं प्रति गच्छ। किंविशिष्टः सन् उदङ्मुखः उत ऊर्ध्वं मुखं यस्य स उ
दङ्मुखः उत्तरा दिगस्ति मुखे वा। कस्मात् सरसनिचुलात् सरसवेतसवृक्षसंयुक्तात्। त्वं किं कुर्वन्। पथि मार्गे स्थूलदस्ताक्लेपान् परिहरन् दिग्
रदहस्तान् परिहरन् त्यजन्। केषां दिङ्नागानां दिग्गजानां। पुनः किं विशिष्टस्त्वं। मुग्धसिद्धांगनाभिः मुग्धाश्च ताः सिद्धांगनाश्च मुग्धसिद्धां
गनास्ताभिः तथाभूताभिः चकितचकितं यथा स्यादेवं तथा दृष्टोत्साहः दृष्टोत्साहः। किंभूताभिः सिद्धांगनाभिः उन्मुखीभिः ऊर्ध्वाननाभिः। किं श
द्रेः स्विदिति विकल्पे पवनः सततगतिर्मातरिश्वा अद्रेः पर्वतस्य शृंगं सानुं किं हरति नयति। अतो हेतोः ऊर्ध्वाननाभिः॥ १४ रत्नच्छायेत्यादि॥
वयारण्यास्ति सुखमत्ति नवदलपालाशस्ताभ्यश्च नतोदं प्रलोनयनादः॥ हे जलधर आखंडलस्य इंद्रस्य एतत् धनुः पुरस्तात् अग्रतः धनु
खंडं प्रभवति उत्पद्यते। कस्मात् वल्मीकाग्रात्। पिपीलिकाविकारो विकृतोन्नत संचयविशेषो वल्मीकः तस्य अग्रं वल्मीकाग्रं तस्मात् वल्मीका
ग्रात्। उत अथवा। वल्मीकः सजललोघनः तस्मात् उत्पद्यते। तत् धनुः कमिव प्रेक्षं प्रत्यक्षं रत्नच्छायाव्यतिकरः वा रत्नानां मणीनां छाया कांत

मेघदूतटी॰

य:तासांव्यतिकर:मिश्रीभाव:सद्भवायेनधनुष्पातेनतव वपु:शरीरंश्यामंहरिद्वर्संश्च अतितरां अतिशयेनकांतिंद्युतिंआपत्स्यतेल
प्स्यते।केनेवबर्हेणेव।यथामयूरस्यपिच्छेनविष्णोर्नारायणस्यद्युति:उत्पद्यते।किंविशिष्टस्यविष्णो:गोपवेषस्यवल्लवकल्पस्य।गोप।
ला।किलकलितवेतसा।किकिविच्छपरिहृदंविसुंआडियंते।किंभूतेनबर्हेण।स्फुरितरुचिना।स्फुरितादेदीप्यमानारुक्कांतिर्यस्यसतथा
विध:तेनभूतेनशोल्लसितकांतिना।नकेवलंपद्धिश्चिह्नितस्यतवश्रोमाला:सएवविषयोपसंगोपित्वविष्णत्वेतद्वर्णोपिनमादद।।रत्नछा
छायत्रमित्यादि।।हेमेघत्वंद्रुतगति:सन्नुरगति:सन्त्वय:पुनरपिपश्चात्उत्तरेण।उत्तराभिमुखेनगच्छ।किंकृत्वा।मनाक्किंचित्मालंग्रामा
तराटवीआरुह्य।तस्योपरिस्थित्वा।किंविशिष्टंमालं।सद्य:सीराकृषणात्हृतं।सद्य:प्रत्यग्रंसीराकर्षणात्लांगलमुखोल्लेखनंतेनसुरभीणिसुक्षे

मालेम्प

त्राणियत्रतंतथाविधं।किंविशिष्ट:त्वंजनपदवधूलोचनै:ग्रामतरुणीलोचनै:पीयमान:सादरमालोक्यमान:अत्यादरावलोकनेपान
मुच्यते।किंविशिष्टैर्लोचनै:भ्रूविकारानभिज्ञै:भ्रूविभ्रमेष्वप्रवर्तितै:पुन:किंभूतैर्लोचनै:इतिहेतो:प्रीतिस्निग्धै:प्रीत्यास्नेहेनस्निग्धानिप्री।
तिस्निग्धानितै:प्रीतिस्निग्धै:।।अस्माकंअन्नदायमिति।प्रीतिदाढ्यै:इतीतिकिंकृषिफलंकर्षणोत्पन्नस्यफलंत्वयिआयत्तं।भवतित्वदधीनंहे
हेतुनिष्पद्यतइतिभाव:।।त्वामासारेत्यादि।।पथिविश्रामस्थानककथनेनअमुंत्वय:शैलोनयत्वात्।।हेमेघसानुमानाम्रकूट:पर्वतोना
म:त्वांनवंतंसाधुशासनंयथास्यात्एवंतथामूर्ध्नामस्तकेनशिरसावक्ष्यतिधारयिष्यति।मूर्ध्ना:पदेनआदरप्रतिपादनं।किंविशिष्टंत्वां।आसार
प्रशमितवनोपप्लवं।आसारेणवेगवद्वर्षणेनप्रशमितोऽपनीतोवनानांतदाश्रितकाननानांउपप्लवोपद्रवपावकःप्लोषोयेनसतं।एतेनास्य
उपकारकारणंभणितं।पुन:किंभूतंत्वां।अध्वश्रमपरिगतं।मार्गखेदव्याप्तं।अमुमेवार्थंस्पष्टेनार्थेनस्पष्टयति।क्षुद्रोपिलघुरपिमित्रे
सुहृदिप्राप्तेसमागतेसति।संश्रयायनिवासायविमुख:पराङ्मुखोनभवति।नज्ञायते।कथंप्रथमसुकृतापेक्षया।प्रथमसुकृतस्यप्राक्
पेक्षाप्रथमसुकृतापेक्षातयाप्रथमसुकृतापेक्षया।सर्वसुकृतासेमेनादृत्वर्धयेन्तीयाततथातेनप्रकारेणउच्चै:उन्नतोय:सकिंभिवरंचात

कृतवंतं त्वां
आसारप्रश
मितदवोपप्लु
वं आसारेण
वेगवद्वृष्ट्या
प्रशमित:रु
पनीत:दवो
पप्लवोयेन
सो० १८

१७ अध्वक्लांतं त्वा हे जलद आम्रकूटः सानुमान् तुंगेन उच्चैस्तरेण शिरसा मस्तकेन वक्ष्यति धारयिष्यति कथं त्वं तं अध्वक्लांतं मार्गखिन्नं पुनः कथंभूतं त्वां प्रतिमुखगतं सन्मुखमागतं । कथंभूतः आम्रकूटः साधु
मानः वसुसमानः हे मेघ प्रशमितस्य आम्रकूटस्य नैदाघं अग्निं ग्रीष्मकालानं दवानलं आसारेण वेगवत्तरवृष्ट्या प्रशमय । एवं नयेः युक्तोऽयमर्थः कस्मात् कारणात् उत्तमानां संपदः आपन्नार्तित्राणनफ
लानवंति अथवा पाठांतरं सद्भावाद्वः फलति न विरेणोपकारो मद्विधेषु इति भावः यतः कारणात् मद्विधेषु उपकारः चिरेण न फलति तत्कालमेव फलतिक कथंभूतः उपकारः सद्भावाद्वः ॥ पाठांतरं ॥ २२

वति न नवती त्वर्थः स किं अनुचितमाचरिष्यति नेत्यर्थः ॥ १७ छन्नोपांतः इत्यादि ॥ त्वदर्थं यदा नस्तं तोपशोभां सारावयत्नाद । हे मेघ अचं
लः आम्रकूटः नूनं निश्चितं अमरमिथुनप्रेक्षणीयां देवदेवीयुगलानां दर्शनयोग्यां अवस्थां यास्यति प्राप्स्यति । किं विशिष्टः अचलः छन्नोपांतः
प्रांतपर्यंतः सति त्वयि सवति शिखरं स्निग्धं आरूढे सति । किं काननाम्रैः वनमध्याम्रवृक्षैः कथंभूतैः काननाम्रैः परिणतपक्वफलद्योतिभिः
पाकपिंगलैः फलैः शोभायमानैः । किं विशिष्टे त्वयि । स्निग्धवेणीसवर्णे कांतिमत्कबरीसमाने अपि आम्रकूटः क इव । पुनः स्तन इव पयोधर इ
व । किं विशिष्टः । किंभूता स्तनः मध्येश्यामः कृष्णः चूचुकप्रदेशे शेषविस्तारपांडुः शेषविस्तारेण पांडुरः पांडुरवर्णः मध्याद्वक्षिट
परिणाहशिष्टः गौरः ॥ १८ स्थित्वेत्यादि ॥ प्रभो नव मद्वसुदर्शनमस्योपदिशन्नाह । तस्मिन् गिरेरनंतरं पंथानं अतिक्रांतः सन् हे मेघ रेवां नर्मदां नाम
नदीं द्रक्ष्यसि अवलोकयिष्यसि । किं त्वं तस्मिन् आम्रकूटपर्वते स्थित्वा उषित्वा । किं विशिष्टे तस्मिन् । वनचरवधूभुक्तकुंजे । किरातांगनासेवि
तलतापिहितघनप्रदेशे गगनकुहरेषु क्षणमात्रं स्थित्वा । किं विशिष्टः त्वं तोयोत्सर्गद्रुतं उदकत्यागात् द्रुततरगतिः त्वरिततरगमनः । किं विशिष्टे
तस्मिन् उपलविषमे नीचोच्चपाषाणविषमे । पुनः किंभूते तस्मिन् विंध्यपादे विंध्याद्रिपर्यंतनगे । किंभूतां रेवां । विशीर्णां खंडशो गतां । उत्प्रेक्षते गजस्य
अंगे रचिते भक्तिच्छेदैरिव विभिन्नां विरचितां तस्मात् क्लिष्टां दरिव । विच्छित्तिपरस्तं गैरिव । एतेन विंध्यपादान्निःसृतां सिंधुरवाध्यारोप । तदंतः सान्निध्यस्ति
पत्रावलीरचनास्य प्रकाशनेन रेवायाः रमणीयकं दृश्यमानत्वं प्रोक्तं ॥ १९ तस्यास्तिक्तैरित्यादि ॥ हे घन हे मेघ तस्याः रेवायाः नद्याः तोयं जलं गृ
हीत्वा आदाय गच्छेः यायाः । किं विशिष्टं तोयं तिक्तैः तिक्तैः करसेः वनगजमदैः काननकरिमदैः वासितं सुरभीकृतं । किं विशिष्टो घनः वांतवृष्टिः वांत
वृष्टिर्येन स वांतवृष्टिः कृततोयपरित्यागः ॥ वांतस्य वतिक्तः कषायस्वरसः उमसस्पते ॥ किं विशिष्टं तोयं । जंबूकुंजप्रतिहततरयं । जंबूलताजालैः स्ख
लिततोयवेगं । हे मेघ त्वां तवंतं अनिलो वायुः तुलयितुं कंपयितुं न शक्नोति । न प्रेरयिष्यति । किंभूतं त्वां अंतःसारं । अंतर्मध्ये सारं बलं यस्य स तं जा
तबलं संतं । विहितवदनादि शुद्धीनां रिक्तकोष्ठत्वेन निस्सारशरीरं मरुदतिसवति । तदर्थं तिरन्यासेन निरूपयति । द्विस्फुटं निश्चितं रिक्तः शी
णविन वः सर्वोपि समस्तोपि लघुः नादरणीयो भवति । ऊ यत पूर्णता । पूर्णस्य स्वावोऽपूर्णता गौरवाय गौरवाय सर्वस्य भवति । २० मार्गोपदेशनार्थं

मेघदूतटी०

माह॥ नीपंदृष्ट्वाहरितेत्यादि॥ हे घन सारंगास्त्वमराः नीपदलग्रस्थवान्। सारंमधुरंगायंतीति सारंगाः भ्रमराः ते तव मार्गं अध्वानं सूच
यिष्यंति परस्परं कथयिष्यंति। किल अनेन पथा अस्थितो मेघः परमस्मात्ति। मंदत्तागेयः नष्टः इति परस्परं कथयिष्यंति। किंकृत्वा नीपं कदं
बकुसुमं दृष्ट्वा अवलोक्य किंविशिष्टं नीपं केसरैः मकरंदाधारैः हरितकपिशं हरितं च तत्कपिशं च हरितकपिशं। नीलकपिशं। कर्म
धारयः समासः। किंत्तत्तैः केसरैः अर्द्धरूढैः अर्द्धसमुत्पन्नैः कंदलीदर्शनप्रस्तावे प्रक्रमाद्युसारंस वरंगछंती ति सारंगाः हरिणाः तव मार्गं पंथा
नं सूचयिष्यंति। किंकृत्वा वधुनः चकारः क्रियासमुच्चयार्थः अनुकछं कछे कछे अनुलक्षीकृत्य अनुकछं कंदली कंदलं श्रेणीरालें ×वनस्पतिविशेषा द्रु×प
बा। कथंभूता कंदली। आविर्भूतप्रथममुकुला॥ संजातनूतनवनकोरकाः। पुनः दग्धारण्येषु वीतगतवातघ्राणप्रकरणाद्यसारं
सलिलं गछंतीति सारंगाः करिणः ते तव मार्गं सूचयिष्यंति। किंकृत्वा उर्व्याः भुवः गंधं आघ्राय संघित्वा। केषु दग्धारण्येषु। ग्रीष्मदा
वलुष्टकाननेषु॥ किंविशिष्टं गंधं अधिकसुरभिं। अतिशयसुगंधि। उर्व्याः पृथिव्याः गंधः स्वाभाविक एव जलकणसिक्तायाः पुनः
स्तूयात् सवतीति उक्तं। कवितरसूरयः इति कथयंति। कर्दमाकुलायां इला विलायां गजानां मद्गानकष्टः वरसानंक्रमणवातयस्यागमे
यस्यास्वातेमद्कष्टसमुत्पद्यते। सदत्ता गमंकथं सूचयष्यति। अत्र गजाः निबद्धा रिताः उत सारंगाः चपीडकास्ते मार्गं सूचयिष्यंति। किं
विशिष्टस्य ते जलव मुचः जललवान् जलकणान् मुंचतीति जललवमुक् तस्य जललवमुचः तोयजलवर्षिणः ते तु जलकणाकांक्षि
णः अतस्ते मार्गं सूचयिष्यंति॥२१॥ अंतोबिंदु उपद्रणेत्यादि॥ हे मेघ सिद्धाः देवविशेषाः प्रियसहचरी संभ्रमालिंगितानि मानयिष्यं
ति अनुभविष्यंति। अन्यमनस्कानां सिद्धानां बदीयो ऊर्जितगर्जितमाकर्ण्य संजातसंभ्रमाणां वधूतेतव नितानां चाटुशतदुर्लभानि अपि
स्वयंकंवयदाश्लेषसुखगानि गाढोपगूढानि अकस्मादयत्नसाध्यानि भविष्यंतीति भावः। किंस्वास्त्वनित समये गर्जितकाले चास वंतं
मासाद्य धाप्य। किंत्तत्तानि प्रियसहचरीसंभ्रमलिंगितानि। सोकंगानि उकंगसहितानि। सिद्धाः किंकुर्वंतः बलाकाः विसकंटिका
अरिगणनया असंख्यं पंक्तौ स्थितं सर्वतो गणनेन परिसंख्यया निर्दिशंतः अंगुल्यग्रेणदर्शयंतः। किंत्ततां बलाकां श्रेणीभूताः अश्रे

गर्भोदेयोनरवयमा... ...परोपकारिणमाद्य×प

५१

सिद्धा

एयः श्रेणीयोत्तवंतिश्रेणीत्तताः पुनः के सिद्धाः किं कुर्वंतः चातकान् सारंगान् वीक्षमाणाः अवलोकयंतः किंभूतान् चातकान् अंतोबिंदुग्र
हणरसान् अंतसां बिंदवः अंतो बिंदवस्तेषां ग्रहणे तत्र रत्तसोयेषां ते तथा तान् ॥२२॥ चोदस्रारामणीयकविलोकनेन कालविलंबं निषेधय
तुमाह ॥ उत्पश्यामीत्यादि ॥ हे सखे मित्र ते तव कालक्षेपं कालविलंबं उत्पश्यामि उत्प्रावल्येन ईक्षामि ते किं कर्तुं मित्रोः द्रुतमपि शीघ्रमपि मत्
प्रियार्थं मत्प्रीतिहेतोः प्रियासंगं तु मित्रोः मम प्रियं मत्प्रियं तद्देवार्थः प्रयोजनं यत्र गमने तत्तमद्धितद्धेतोः अस्मत्प्रियसंदेशकथनार्थं वा ॥ क्व काल
क्षेपं तव विष्पति पर्वते पर्वते । ककुभ ककुभि । किं विशिष्टे ककुभि । ककुभ सुरत्तो । अर्जुनवृक्षसुगंधे । किं विशिष्टे । शुक्लापांगैः मयूरैः कथमपि केना
पि प्रकारेण त्वद्यूयातः कृतास्वागतः । किंभूतैः शुक्लापांगैः सजलनयनैः चिरकालसुहृद्दर्शनेन बाष्पवारिपरितनेत्रैः किंरवा केकाः वाणीः स्वा
गतीकृत्य । अस्वागता स्वागता कृता स्वागतीकृता केका तं प्रतिस्फुटदृष्टिनवककुभसमकुसुमसुरभित्रिभुवनिबद्धवसतेः सादरोद्गीरिततारमयूररवाया
कर्षनमुदितचेतसः तव कियतापि कालकला विलंबः संतान्मतएव इति भावः त्वदानुषंगं तुं गमनाय आशु सोद्यमवसतेः । व्यवसायं कुर्यात् ॥ २
२ पांडुच्छायोपवनेत्यादि ॥ हे जलद दशार्णाः देशाः हंसा मरालाः कतिपयदिनस्थायिसंपत्स्यते संतं विस्पंति । कतिपयदिना नितिष्ठंतीत्येवं शीला
हंसा मराला येषु तोयादवंतो । रम्यस्तनीरं श्रुमलधरधाराधोरिणीतिः अतितोऽकुलन्यादिलयनितात्वनवहंसावस्थानं युज्यते । किंभूता दशा
र्णाः परिणतिफलश्यामजंबूवनांताः पक्वफलैः श्यामा कालकांतयः जंबूवनानां अंताः पर्यंताः येषु ते । कसतीत्वयि त्वयि सति समासन्ने सति त्वयि
नः किंभूता दशार्णाः आकुलग्रामचैत्याः आकुला विसंस्थुलाग्रामाणां चैत्याश्चतुःपादपा येषु ते । पुनः कथंभूता दशार्णाः केतकैः के
तकीपुष्पैः पांडुच्छायोपवनवृत्तयः पांडुच्छाया अवदाता कांतयश्चोपवनानां उद्यानानां वृत्तयः कंटकिवीरुदावृत्तयो येषु ते । किंभूतैः के
तकैः सूचिभिन्नैः सूचिसमुद्भिन्नैः पुनः किंभूतैः केतकैः गृहबलिभुजां वटकानां नीडारंभैः आलयोपक्रमैः ॥ २४ ॥ तेषां दिक्षु प्रथितेत्यादि ॥
हे मेघ तेषां दशार्णानां राजधानी तपनिवासनगरी दिक्षु आशासु सद्यः शीघ्रं गत्वा समासाद्य अविकलं संपूर्णं फलं अतिकाम्यं कामकस्य कामित्वावस्य
लब्धा प्राप्स्यसे । किं विशिष्टां राजधानीं । प्रथितविदिशालक्षणां । प्रथितं विख्यातं विदिशेति लक्षणं नाम यस्याः सा प्रथितविदिशालक्षणा तां तथोक्तां ॥
हे मेघ वेत्रवत्याः नद्याः पयोजलं यस्मात्कारणात् पास्यसि । किं विशिष्टं पयः स्वादु स्वादिष्टं पुनः कथंभूतं । चलोर्मि चंचलवीचि । पुनः कथंभूतं पयः

×यद्वायतेषाय हाड्नेरापुराम नीयवनमायं विदधात्मिति अत्र मानालंकारः । अत्र मवहम मदद्विसम्बंधा तिथनेनालात्र रेलस अलोनय त्रोदः प

×अत्रोपमालंकारः॥ विलासवासोचितहर्म्यविकेतन त्रियामोद्वेन नारिदसात्कशाति दर्शयत्याह ×३

मेघदूतटी०

यः तीरोपांतस्तनितसुभगं। नीरोपांते तटे निकटप्रदेशे ॥ प्रसादत्वात्स्तनितध्वनितं तेन सुभगं सुंदरं यत्पयः तत्तत्पयः किमिव सभ्रूभंगं सभ्रू
विलासं मुखमिव। आस्यमिव। भ्रूसंयुक्तं मुखमिव। यतः अन्योपि यः कश्चित्कामुको राजधानीं गच्छति सोपि मानिन्याः कुटिलसुंदरं यथा स्यात्तथा सेवते। एवं
वेत्रवत्याः वेत्रनाम्नी नद्या रसिकया नायिकायाः स्वादुमधुरं मुखरूपं वा कामितायाः फलं लप्स्यते॥ २५ नीचैराख्यमित्यादि॥ हे मेघ नीचैरा
ख्यं नीचैरिति आख्या संज्ञा यस्यासौ तं गिरिं शैलं अधिवसेः अध्यासय। कस्मै तस्मिन् द्रोमाग्रे विश्रामहेतोः मार्गखेदापनयनाय। उच्छ्व
तकदंबैः नीपपादपैः तव संपर्कात्तव संगमात् पुलकितमिव। जातरोमांचमिव। सुहृदालिंगनेन प्रणयिना पुलकक
लिकाकलितवपुषः संपद्यंते। किंविशिष्टैः कदंबैः प्रौढपुष्पैः विकसितकुसुमैः। यः गिरिः नागराणां नागरिकलोकानां नांत
उराणां वा यौवनानि तारुण्यानि शिलावेश्मभिः उपलगृहैः दरीभिः प्रथयति। प्रकाशयति। किंभूतानि यौवनानि। उद्दामा
नि उदाराणि। किंविशिष्टैः शिलावेश्मभिः पण्यस्त्रीरतिपरिमलोद्गारिभिः पण्यस्त्रीणां पण्यांगनानां रतिषु सुरतकेलिषु
यः परिमलः तद्वत्सुरुषप्रलिप्तचंदनादिविमर्दनामोदस्तं उद्गिरंतीति उद्वमंतीति एवंशीलानि तैः एवं कृतैः॥ २६ विश्रांतः इत्यादि॥ हे मेघ वि
श्रांतः सन्॥ कामलालसानुविद्धं अध्वानमुपदेष्टुमाह॥ हे मेघ त्वं विश्रांतः सन् कृताध्वखेदापनोदः सन् वनजरुगजयायाः त्वं किं कुर्वन् उद्या
नानां आरामाणां यूथिकाजालकानि मल्लिकासमूहानि सिंचन् उक्षन्। कैः नवजलकणैः प्रथमजलकणबिंदुभिः। किंविशिष्टः सन् पुष्पल
वीमुखानां पुष्पाणि लुनातीति पुष्पलावीनस्तेषां कर्मणा ध्रायादानात् आतपप्रतिरोधात्। कृतपरिचितः कृते तस्मिन् समये कृतं वा
परिचितः प्रणयात्तव। किंभूतानां पुष्पलावीमुखानां। कांतकपोलसलानां। म्लानश्रवणोत्पलानां। कथं गंडस्वेदापनयनरुजा। पुष्पाव
चयप्रयासजनितकपोलश्रमजलप्रोंछनपटयातघाकर्णोत्पलस्पर्शेरलक्ष्मीवनां वलरुवाम्लानानि नानीतानि। अथः कृतानि कपोलल
लितानि यंते॥ २७ वक्रः पंथेत्यादि॥ हे मेघ तव तत्र वयद्यपि यद्यपि उत्तराशां उदीचीं दिशं प्रस्थितस्य गच्छतः वक्रः कुटिलः पंथा मार्गः
स्यात्। तथापि एवं सत्यपि उज्जयिन्याः अवंत्याः सौधोत्संगप्रणयविमुखो मा स्म भूः॥ सौधानां सुधाधवलितप्रासादानां उत्संगे क्रोडे तस्य
प्रणयेन स्नेहेन परिचयस्तस्मात्। विमुखो मा भूः। तत्र तस्यां नगर्यां विद्युद्दामपौरांगनानां नगरनारीणां लोचनैः नेत्रैः न रमसि न क्रीडसि

×अत्रोत्प्रेक्षालंकारः×२

जातिरुपवनज रुकणिकाः सि कानि स्फुटंति

×अत्रानुमानालंकारः×२ ×अत्रोतिस्वाभाविकायनिवेदनं×३

तदा असित्वं वंचितः कथंभूतैर्लोचनैः लोलापांगैः चटुलप्रांतैः पुनः कथंभूतैर्लोचनैः विद्युद्दामस्फुरितचकितैः विद्युद्दाम्नेन स्फुरि
तेन चकितानि त्रस्तानि तैः तथाभूतैः पणाकलायरुचिगुणाद्दषितत्रस्तैः। २५ वीचिक्षोभेत्यादि॥ मार्गे पदेशाद्धारेण पाथोद स्ववनिता
वेन अभिधीयमान नदीः हृदय विरहवस्वाकथनेन तत्राघतांस्निरूपयन्नाह। हे मेघ निर्विंध्यायाः निर्विंध्याभिधानायाः नद्याः पथि
मार्गे त्वत्प्रवर्त्ततां। किं रुचारसाभ्यंतरं अंभोगसंनिपत्यच विरूप। निर्विंध्यायाः किं कुर्वंत्याः स्खलितसुभगं यथास्यादेवं स्खलितेन शि
लादिप्रतिबंधेन सुभगं सुंदरं कामिन्याः स्वकमनीयकामुकविलोकनानुगमनविलासालयं स्ववति यथा तथा संसर्पंत्याः प्रयांत्याः पुनः किं
विशिष्टायाः निर्विंध्यायाः वीचिक्षोभस्तनितविहगश्रेणिकांचीगुणायाः वीचिक्षोभेन कल्लोलचलनेन स्तनितविहगश्रेणि आसि
तत्राकूजनपंक्तिः सैव कांचीगुणो मेखलादाम यस्याः सा तथोक्ता। अपि पदे पदि शिरोणावर्त्तउपमानेन विग्रहः पुनः कथंभूतायाः दर्शितावर्त्त
नाभेः दर्शितः प्रकाशितः आवर्त्त अंतःसंभ्रमः एव नाभिर्यया सा तस्याः तथाभूतायाः हि स्फुटं निश्चितं स्त्रीणां योषितां प्रियेषु वल्ल
भेषु विभ्रमो विलासः आद्यं प्रथमं प्रणयवचनं प्रीतिसंभाषणं भवति। २७ वेणीभूतेत्यादि॥ हे सुभग सिंधुर्नाम नदी येन विधिना
येन प्रकारेण कार्श्यं कृशिमानं त्वदासां तत्यजति परिहरति। स विधिर्मार्गः त्वया भवतात् उपपाद्यः उत्पादनीयः सिंधुर्नदी किं कुर्वती तेन वसोभाग्यं
सुभगं निजविरहावस्थया वियोगदशाया प्रकटयंती व्यंजयंती॥ किं विशिष्टस्य ते। तां निर्विंध्यां नाम नदीं अतीतस्य अतिक्रांतस्य। किं विशिष्टा
सिंधुः वेणीभूतप्रतनुसलिला वेणिदंडीभूत स्वल्पजला। पुनः कथंभूता सिंधुः पांडुच्छाया धवलकांतिः केः जीर्णपत्रैः शुष्कपत्रैः कथंभूतै
तैः शुष्कपत्रैः तटरुहतरुभ्रंसिभिः कूलजात वृक्षेभ्यः पतितैः। २८ प्राप्यावंतीनुदयेत्यादि॥ हे मेघ त्वं पूर्वोद्दिष्टां प्रथमगदितां विशालां उज्ज
यिनीपुरीनगरीं अनुसरगच्छ। किं विशिष्टां विशालां। श्रीविशालां। श्रिया लक्ष्म्या विशाला श्रीविशाला तां तथाभूतां विशालेत्येवं नाम॥ या
५ दिवा विशिष्टाः प्राकारा भवनविशेषा वा यस्याः सा तां तथाभूतां विशालां। किं कृत्वा। अवंतीन् मालवाभिधानजनपदान् प्राप्य आसा
मे०टी०२५ द्य। किं विशिष्टान् अवंतीन्। उदयनकथाकोविदग्रामवृद्धान्। उदयनस्य वत्सराजस्य कथावरितं तत्र कोविदाः पंडिताः ग्रामाणां वृद्धाः प्र

×अत्रउलक्षणमारूपकयोः संकरालंकारः×४ ॥ अवंत्याः उदयनस्य ... लंकारः२

यस्याः येषु तेतान्। क सति। सुचरितफले श्रेयःकर्मणः फले स्वर्गोपभोगलक्षणे। स्वल्पीभूते उपभोगान्। अपचितपरिमाणे सति॥
उत्थैर्हतैर्दिवः स्वर्गस्य एकं अद्वितीयं खंडं अंशं हृतमिव। इवात्रानीतमिव। कांतिमत् श्रीमत् तत्केः जालैः सुकृतैः किंभूतैः सुकृ
तैः शेषैः अवशिष्टैः केषां गां भुवं स्वर्गिणां देवानां गतानां भाग्यानां॥३१ दीर्घीकुर्वन्नित्यादि॥ हे मेघ यत्र पुरि सिप्रावातः सिप्रान
दीपवनः स्त्रीणां नारीणां सुरतिग्लानिं संभोगश्रांतिं हरति। स्फेटयति। किंभूतः सिप्रावातः अंगानुकूलः स्पर्शसुखदः किंलक्ष
वित्रिविधो वर्ण्यते। सीतो मंदः सुरभिश्च। सुखस्पर्शगुणेन सौख्यदः कथितः सुरतक्रमहरगुणेन शीतत्वं व्यक्तीकृतं। पुन
किंभूतो वायुः स्फुटितकमलामोदमैत्रीकषायः स्फुटितानि विकसितानि कमलानि कोकनदानि तेषामामोदः परिमलः तस्य मै
त्री संपर्कः तया कषायः प्राप्तवासः सुगंधिः अनेन सुरभित्वं प्रोक्तं। सिप्रावातकः इव। प्रियतमः इव यथा दयितः स्पर्शसु
खदो भवति। किं विशिष्टो प्रियतमः प्रार्थनाचाटुकारः सुरतयाच्ञार्थं चाटूनि करोति। तथा प्रार्थनाचाटुकारः सिप्रावातः किं कुर्व
न् प्रत्यूषेषु प्रातः संध्यासु सारसानां पक्षिणां कूजितं विरुतं पटु स्पष्टं मदकलं मदेन मनोज्ञं दीर्घीकुर्वन् प्रसारयन्। प्रियत
मेन साम्यं॥३२ हारांस्तारानित्यादि॥ हे मेघ सलिलनिधयः समुद्राः तोयमात्रावशेषाः अ सलिलमात्रमेव अवशेषं येषु ते तथा
विधाः संलक्ष्यंते ज्ञायंते। किं कृत्वा। यस्यां नगर्यां विपणिरचितान् पण्यवीथीस्थापितान् दृष्ट्वा अवलोक्य। विशेषणद्वारेणाह। किं
भूतान् विपणिरचितान् हारान् हारमुक्तान्। किंभूतान् हारान् तारान् निर्मलान्। पुनः किंभूतान् स्वारलगुलिकान्(?)। स्थू
लमुक्ताफलान्। पुनः किंभूतान् कोटिशः अनेकशः शंखशुक्तीः शंखाश्च शुक्तीश्च शंखशुक्तीः पुनः किंभूतान् शष्पश्यामान्
वर्लहरितवत् हरितवर्णान्। पुनः किंभूतान् मरकतमणीन्। गारुडमरकतरत्नविशेषान्। कीदृशान् मणीन्। उन्मयूख
प्ररोहान्। उद्गतकांतिपल्लवान्। अतो हेतोस्तोयमात्रावशेषाः सलिलनिधयो ज्ञायंते॥३३ प्रद्योतस्येत्यादि॥ हे मेघ यत्र य
स्यां नगर्यां अभिज्ञो विदग्धो उदयनो लोकः प्रागतान् नगरदेशादागतान् बंधून् स्वजनान् इति अनेन प्रकारेण रमयति विनोदयति

हे मेघ अत्र उरि वत्सराजः उदयनः प्रद्योतस्य चंडप्रद्योतनाम्नोराज्ञः प्रियदुहितरं प्रियां वासवदत्तां वासौ। उदिततांप्रियदुहितरं वासवदत्तां
उऋन्हृतवान्। अत्रैवतस्यैवराज्ञः प्रद्योतस्य तस्यतः हे मेघ संतालद्रुमवनं अभूतत्रस्वव। अत्र स्थाने अनलगिरिरद्रस्तीस्तंभमु
त्पाद्यउन्मूल्यदर्पात् किलइतिसत्यउद्भ्रांतः मदविकलोबस्वामी। इथ ज्ञालाजी लोरित्यादि॥ हे मेघ अस्याः नगर्याः हर्म्येषुगृहेषुस्व
दंश्रमं नीवाअतिवाह्यभूत्वा। किंविशिष्टेषुहर्म्येषु। कुसुमसुरतिषु। पुष्पैः सुगंधिषु। किंविशिष्टः इंअध्वरिक्तांतरात्मा। अध्वनामार्गगमनेन
खिन्नः श्रांतोअंतरात्मामनोयस्यसतादृक्। पुनः किंविशिष्टेषुहर्म्येषु। ललितवनितापादरंगांकितेषु। ललितवनितानां नारीणां पादरागः च
रणालक्तकस्तेनांकितेषु चिह्नितेषु। किंविशिष्टं केशसंस्कारधूमैः केशानांपोरजनस्त्रीणांसंस्कारः उपस्कारः तदर्थं धूपधूमास्तैः हद्यम
नस्अरूलरधूमः धूमैरित्यर्थः उपचितवपुः पीवरशरीरः। किंलतैः केशसंस्कारधूमैः जालोद्गीर्णैः गवाक्षायनद्वारोद्गतैः। पुनः किंविशिष्ट
ंवंधुप्रीत्याभुहृत्प्रीत्यास्नेहेन भवनशिखिभिः मंदिरमयूरैः दत्तनृत्योपहारः दत्तोवितीर्णो नृत्यं तांडवं तदेवउपहारः सपर्या यस्मैसतादृक्। वंअव
लोकयप्रमुदिताः नरीर्षितिं॥ इ५ तर्तुः कंवेत्यादि॥ हे मेघ त्वंचंडीश्वरस्यदृशरण्यउरण्यं पवित्रं धाम गच्छेः यायाः गवेः किंभूतस्यचंडीश्वरस्य त्रिभु
वनगुरोः त्रिलोकश्रेष्ठिस्य। किंविशिष्टः त्वं। प्रथमैः सादरं सबहुमानं सभयत्वं यथा स्यात्तथा वीक्ष्यमाणः अवलोक्यमानः। किंविशि
ष्टः त्वं। तर्तुः स्वामिनः कंठच्छविरिति। हरगलतुल्यकांतिरिति। किंविशिष्टं धाम। मरुद्भिर्वातैः धूतोद्यानं। कंपितोपवनं। किंविशिष्टैमरुद्भिः कुव
लयरजोगंधिभिः कुवलयानां उत्पलानां रजसां मदरंदरेणूनां गंधः आमोदो विद्यते येषां ते रतैः तथा तैः अनेनयुक्तेनस्नुरतिवंशति
पादितांपुनः किंतैः वर्तिः तोयक्रीडानिरतयुवतिस्नानतिक्तैः तोयक्रीडाजलकेलिस्तत्रनिरता आशक्ता युवतयः पौरवनितास्तासां
कुंकुमादिजपलेपस्नानं मज्जनं तेनमतिक्तैः सुरभिकरसामोदैरितिः। कस्या गंधवत्यानद्याः॥ उक्तअन्यस्मिन्जलधरे त्यादि॥ हे जल
धर हे मेघ तत्रयाम्यप्यन्यस्मिन्अपरस्मिन्नपिमहाकालं देवविशेषं आसाद्यप्राप्यकालेप्रस्तावे स्थातव्यं रक्षणीयं यावत्तावत् श्रीलयं न
यनविषयं अत्येतिलोचनपथेयावत्भानुः सूर्योवर्तते अनस्तमितस्त्वं वैं दुंकिं कर्वदासंध्या वलिपटहतां संध्यादिनादिमध्यांतलहः।

॥ कथं सादरं सा
दरत्वे कारण
माह ४

५३२

...दिमतिभातमाह ४३

अत्ररूपकालंकारः ४३

णास्त्रियः तासु वलयः रत्नोपहारः तत्र पदं दत्तां कुर्वन्। आनकतां कुर्वन्। कस्य स्तनितः इत्यस्य। किंभूतं संध्यावलिपटहतां श्लाघ
नीयां असंसनीयां। आमंद्राणां। अतिगंभीराणां। हे मेघ गर्जितानां गल गर्जीणां। अविकलं संपूर्णं फलं श्रेयारूपं लप्स्यसे प्राप्स्य
सि॥ ३७ पादन्यासेत्यादि॥ हे मेघ तत्र महाकाले वेस्याः देववारवनिताः त्वयि त्वत्तिविषये कटाक्षान् नेत्रान्तान् आमोक्ष्यंते प्रक्षिप्स्यं
ते। किंविशिष्टान् कटाक्षान्। मधुकरश्रेणिदीर्घान्॥ मधुपपंक्तिवत् आयतान् दीर्घान्। किं कृत्वा वर्षाग्रबिंदून् दृष्ट्वा प्रथममपतित
करेण आनप्राप्य लब्ध्वा। किंविशिष्टान् वर्षाग्रबिंदून्। नखपदसुखान्। नखानां कररुहाणां पदानि क्षतानि तेषु सुखदहेतून् बाल
सुखदातान् नखपदसुखान्। किंविशिष्टा वेश्या। चामरैः बालव्यजनैः क्लान्तहस्ताः करतलश्रान्ता। पुनः किंभूता वेश्या। पाद
न्यासक्वणितरसना। पादन्यासेन चरणारोपणेन क्वणिता रसिता रसना मेखला यासां ता। किंविशिष्टैश्चामरैः लीलावधूतैः दोलं
दोलितैः पुनः किंभूतैः चामरैः रत्नच्छायाखचितवलिभिः रत्नानां मणीनां छाया कांतयः ताभिः खचिता संबद्धा वलयस्तद्दंडमं
डलीरूतपर्वरेखविच्छित्तयो येषां तैः। अथवा खचिता करितावलयः यासां तासामेव चामरग्राहिणीनां उदाररेखावलयस्तैस्तत्पात्रै
तैः॥ ३८ पश्चादुच्चैरित्यादि॥ हे मेघ पश्चात् गमनानंतरं पशुपतेः हरस्य आर्द्रनागाजिनेच्छां कीलालक्लिन्नकरिचर्मेच्छां हरन्त्वा रंस्त
नाद्योपक्रमे हरश्रय। किंविशिष्टः त्वं सांध्यं तेजः संध्यासु त्वं सांध्यं प्रकाशं दधानो धारयन् रक्तरूपं त्वं तत्र मंडलेन तिर्यगूर्ध्वागेन
अतिलीनः संश्लिष्टः। किंविशिष्टं तेजः प्रतिनवजपापुष्परक्तं। अतिनवोच्छिन्नजपाकुसुमास्तरणं। पुनः किंविशिष्टं तेजः शांतोद्वेगा
स्तिमितनयनं शांतः शमं गतो उद्वेगो यस्यां सा वात्त्वीनां वपुलसंउद्वेगत्वा स्तेन स्तिमितेन निश्चलेन नयनेन विलोकने यत्र दत्तं स्ति
नस्तथाविधं। अथवा। वीतस्याकारकरचित्तदर्शनाउद्वेगः प्रद्वेषः प्रशांतेस्तेन स्तिमितो निष्कंपस्तेन स्तिमितो अतिरनिष्कंपः प्रति
पुकाशात्रैवेतियथा स्यात्। पुनः उच्चैः अत्यर्थं भुजतरुवनं बाहुदंडखंडमंडलं। किंविशिष्टः स्त्रालनवान्याः गौर्याः दृष्टतकि
अवलोकितवत्तिभिः॥ ३९ गच्छंतीनामित्यादि॥ पकारोपकारकत्वेन श्रोसादयन्नाम्। हे मेघ तत्र तस्मिन् स्थाने योषितां अति

अत्रोपमालंकारः ४०

सारिकाणां च स्तुवंउद्वीदर्शयड्कासया। योषितां किं कद्दैतीनां रमणानामगेहं प्रियमद्दं गद्दं रा जो यांतीनां। कसविनकं रात्रौ तमोभिः
अंधकारैः नरपतिपथे राजमार्गे रुद्धा सतिलोकेसति। अवद्दष्ठु अकाशे सति। किंविशिष्टै स्तमोभिः सूचिभेद्यैः सूची विदार्यैः कया सुवर्णदर्शि
यासौदामिन्या। विद्युता रुचा। किंविशिष्टया सौदामिन्या। कनकनिकषस्निग्धया दमकषवल्लअरूरूपा। हे मेघ त्वं तेषां अग्रे स्तनितमुख
रः मास्म भूः मा भूयाः उत्सवर्षाणां नंतरं स्तनितेनगर्जितेन मुखरो वाचालश्च वना। परुषध्वनिर्मा भूघा। यतस्ताः स्त्रियः विक्लवाः स्वस्तः देनभीर

× अत्राविसयो हे पयोः संकर ... लोगपयोदग मने संप्रवर्ज्ञे यंत्रादह ×५

वः॥४० तां कस्यां विद्युत्वनेत्यादि। हे मेघ त्वं तां वनयच्छ्रेषं अवशिष्टमार्गेषु नरपि वाद्दयेत् समापयेत्। किंकृत्वा सूर्ये नानौ दृष्टे च पुनः गो
चरवारणीतां इत्वां कांक स्यां विद्युत्वनवलभौ। अन्यतरस्यां भवनानां वेश्मनि। वलभिउपरितन भूमिः तस्यां रात्रिं विमोयामानीया। अति
क्रम्य। किंभूतायां भुवनवलभौ। सुप्तपारापतायां। अजागरूककलरवायां तेन्दितत्वात्। पारापतपतत्रिणः कामिनी कंव कूजने
न जागरूका भवंति। किंविशिष्टः त्वं सिवविद्युत्कलत्रः खिन्नं श्रांतं विद्युदेवकलत्रं यस्य सतथा। ततः कस्मात् चिरविलसनात्।
बहुकालवनक्रीडनात्। अभ्युपेतार्थकृत्याः अभ्युपेतं अंगीकृतं अर्थं प्रयोजनं कृत्यं करणीयं येते तथाविधाः सुहृदां मित्राणां खलुनि
श्चयेन मंदायंते अलसा न भवंति॥ धरतस्मिन्काल इत्यादि॥ अंतोधरस्य धनिःवीरां गना संगमेन गमनस्य फलत्वा निरूप्य अनाद। हे मेघ
अतः अस्माद्धेतोः आशु शीघ्रं सानोः श्रीमत्सूर्यस्य वर्त्म मार्गं त्यज परिहर। तस्मिन्कालेप्रत्यातः समये खंडितां योषितां स्त्रीणां नयन सलिलं लो
चनांतः प्रणयिभिः दयितैः शांतिं उपशमं नेयं नेतव्यं॥ निद्राकषायमुकुली कृतताम्रनेत्रो नारी नखव्रणविशेषितचित्रितांगः यस्याकृतो
पिगृहमेति पुनः प्रभाते सा खंडितेति कथिता कविभिः पुराणैः॥१ यतः सोपि भानुः नलिन्याः पद्मिन्याः कमलवदनात् कमलामवदनं तस्मा
त् नालेयास्त्रं अवस्पाय जलं हर्तुं प्रत्यागतः प्रत्यावृत्तः। यष्पितवति करुधिर स्निरोधिके अनल्पाभ्यसूयः अनल्पा प्रचुरा अभ्यसूया ईर्ष्या
यस्य सतथा। ततः स्मात् यः कोपि प्रियां प्रति प्रियाकरणाय प्रसारितं करुणाद्धि। तत्र निश्चे उसो पि रोषः पदं करोति। किं पुनः सूर्यस्य नवि
धास्यतीरति स्त्यर्थः एकाशा ना वा वा न त्रि ो निशां कयाप्रत्यागमनमकर्त्तव्ये। अनल्पाभ्यसूयः स्यात् धरगंतीरायाः पयसीत्यादि॥ हे मेघ

Digitized by Panjab Digital Library | www.panjabdigilib.org

मेघदूतटी

तेतवछायात्मापिशति बिंबस्वरूपमपि प्रवेशं अंतरवस्थानं लप्स्यते प्राप्स्यति। कस्यां गंभीरायाः गंभीराति विशालायाः सरितो नद्याः पयसि ज
ले उत्प्रेक्षते प्रसन्ने निर्मले चेतसीव मनसीव। किं विशिष्टः त्वं प्रकृतिसुभगः स्वभावसुंदरः तस्मात्कारणात् अस्या नद्या नायिकायाः
चटुलशफरोद्वर्तनप्रेक्षितानि। चंचलमत्स्योद्वर्तितअवलोकनानि मोघीकर्तुं वंध्यानि विधातुं धैर्यात् तथा खलरूपगणनायकवद्गु
णान् न अर्हसि न योग्योसि। किं विशिष्टानि प्रेक्षितानि। कुमुदविशदानि। कुमुदवत् विशदानि निर्मलानि कुमुदविशदानि निष्केर
वावदातानि। अंगनानां प्रणयिषु प्रेमानुबंधः तत्संभोगादेव सफलतामनुभवति तस्मात्त्वमपि गंभीरायाः एतस्याः प्रीतितरलविलोकिता
नि संगमं विधाय सफलय। एनां परिहर्तुमागाः॥ ४३ तस्याः किंचीसादि। हे सखे हे मित्र तेन तव प्रस्थानं गमनं कथमपि महता कष्टेनसा
वितन्विष्यति। किं कृत्वा तस्याः गंभीरायाः नद्याः सलिलवसनं सलिलं जलं तदेव वसनं वासः हृत्वा। अपहृत्य। किंभूतं प्राप्तवानीरशा
खं। प्राप्ता लब्धा वानीरस्य वेतसस्य शाखा संतताये नेति बहुव्रीहिः पुनः किं विशिष्टं सलिलवसनं। नीलं नीलवर्णं। पुनः किं विशिष्टं स
लिलवसनं। मुक्तरोधोनितंबं। मुक्तस्य क्रोरोधः तीरमेव नितंबो येन तत्तथाविधं। पुनः किं विशिष्टं सलिलवसनं। उत्प्रेक्ष्यते कर
धृतमिव हस्तावष्टंभमिव कामिनः परिधानमपहरतः पुरंध्री पाणिना गृहीतं। किं विशिष्टस्य ते। लंबमानस्य। अंतोन्नतं मंघरावेन
तन्नासक्तस्य। किं विशिष्टः त्वं। ज्ञातास्वादः अनुभूतरसः अथवा पुलिनजघनां पुलिनमेव जघनं यस्याः सा तां तथाविधां विदाजुं
त्यक्तुं कः पुरुषः प्रभुः समर्थः अपितु न कोपि। पक्षांतरे ताहत्वां अर्थांतरस्व पुलिनमिव जघनं यस्याः सा पृथुजघना तां तथावि
धां नायिकां त्यक्तुं कः समर्थः अपितु न कोपि॥ ४४ त्वं निष्पंदोच्छ्वसितेत्यादि॥ हे मेघ ततस्तव पश्चात् जनः नीचैः शनैः शनैः यास्यति संचरिष्यति। किंक
र्तुमिच्छोः ते तव देवपूर्वं गिरिं देवशब्दः पूर्वो यस्य गिरेः स देवपूर्वो गिरिः स तथाविधं गिरिं उपजिगमिषोः उपयियासोः किं विशिष्टो वायुः
शीतः शिशिरस्पर्शः श्रोतारंध्रध्वनितसुभगं करिकरविवरश्रोतोरंध्रतस्य ध्वनितं तेन सुभगं सुंदरं यथा स्यात्तथा दंतिभिः सैकरविदारितिः
गिरिवरकरितिः पीयमानः आस्वाद्यमानः पुनः किं विशिष्टो वायुः त्वन्निष्पंदोच्छ्वसितवसुधागंधसंपर्करम्यः तव निष्पंदस्तोयकणाः अवतं

अनुरूपकोपसेरार्थं तस्याभातांमंकर ४४

२

अत्रतानिर लंकारः ।पु वोदस्य अ दिस्वुतात्रमा दलास्तंत वेनपोसाले रूपमाद ४०

तेनोच्छ्वसिता विकसिता वसुंधरा तस्यां गंधः संपर्कः परिमलः परिचयः स्तेनरम्यो मनोज्ञः वायुः किलस्तरुणः काननोडंबराणां अरण्यउदंबरस्य स्फुलानां
परिणामयिता ॥ पाचयिता ॥ न पातयिता ॥ अपतत्र स्कंदमित्यादि ॥ इमे घनवान् त्वं तत्र तस्मिन् देवगिरौ स्कंदकुमारस्य पयउन्नपनं कारयत ॥ किंविशिष्टं प
रपुरवां नियतवसतिं निश्चितवासं ॥ पुष्पासारैः कुसुमवासैः पुष्पमेघीकृतात्मा ॥ कामरूपत्वात् मेघवत् पुष्पमेघीकृत आत्मा स्वरूपं येन स पुष्पमेघी
कृतात्मा ॥ अनेन पुष्पाणां पवित्रता प्रोक्ता ॥ किंविशिष्टैः पुष्पासारैः व्योमगंगाजलार्द्रैः आकाशगंगानीरक्लिन्नैः कस्मात् पुपास्पतउतित न्मदात्यं निरू
पयति ॥ हि स्फुटं निश्चितं तत् तेजः स्निरूवीर्येनवशरिरंत्तान्ततसंकलालंकारेणांशु नादेसोपकृतानांनासवीनांपंक्तीणां वस्त्रनांसेनानां वास
णामित्यर्णवाधिवाहृद्धाः छः प्राप्नोति ॥ तदत्रवासवोदेवतासत्रास्मिन्नर्थे अग्रर इणायकृतवदनुखेद्रवादवदनेसल्हतंन्यस्तं ॥ किंविशिष्टं तेजः अत्य
हितं आदित्यमतिक्रांतं अत्यादित्यं ॥ धद्ज्यातिर्लेखेत्यादि ॥ पाधोदंअडिप्ततातपसादलांतसंसावयनप्रोसादयन्नाद्रि ॥ इमेघपश्चात्तदनंतरं त्वं दिगांमयू
रं नर्तयेथाः नृत्यं कारयेः ॥ कैः गर्जितैः प्रतिशब्दातगर्जितैः गरिष्ठैः किंविशिष्टैः गर्जितैः अद्रिपदगणगुरुभिः गिरिकंदरायदगणनगरिष्ठैः किंविशिष्टं सं
मयूरं पावकेः अग्निजन्मनः धौतापांगं क्षालितनेत्रांतरं कयाहरशशिरुचा हरस्य महेश्वरस्य शशी चूडाचंद्रः तस्य रुचा चंद्रिकया ॥ अनेन अस्य दृव
दनवनस्य सदा ईश्वरस्य संनिपतत्प्रतिपादनं तं नर्तयेथाः यस्य मयूरस्य किं बर्हं पिच्छं भवानी पार्वती कर्णे श्रवणे करोति धारयति कया प्रीत्या पुत्रस्ने
हेन ॥ किंविशिष्टं बर्हं कुवलयदलप्रापि कुवलयदलं उत्पलपलाशं ततः प्राप्नोति एवंशीलं कुवलयदलानुकारि ॥ पुनः किंविशिष्टं बर्हं गलितं च्यु
तं ज्योतिर्लेखावलयि ॥ तेजोराजिमंडलं वलयितं ॥ आराध्यैनमित्यादि ॥ अयोविशेषाभिगमकवचनेनयपिपयोदं प्रमोदयन्नाद्रि ॥ इमेघ रंति
देवस्य राज्ञः मानयिष्यन् प्रजायिष्यन्कीर्तिं यशः परिणतां च विश्रांतास्मर्यां त्रवादरूपेण तत्रवालंबेथाः प्रतीदेषाः आत्मरूपपरित्यागेन रू
पांतरमापन्नां मेदिन्यां अवदंतीरं तिदेवराज्ञः यदृच्छया स्रुरयः भावः किलालब्धा नद्युर्मेचक्रतरसनिःस्पंदो परयावर्मेवती सरिडदिपायाः कर्धं त्व
तां स्नुरतितनयालंबस्तां ज्ञास्नुरतितनयागावा तामामालंबः कतुस्रुमंत्रनृवेध्यापादः तस्मात् त्वं ज्ञातां तत्त्वचोऽस्ति किंकृतस्त्वं सिद्धद्वंदैः देवदंपतीति
वीणिनिः वीणासंयुक्तैः मुक्तमार्गः कस्मात् जलकणभयात् तोयकणशंकातस्मकंवत्मी ॥ वीणावल्लकी सा विद्यते येषां ते वीणापाणिनः य

ध६१ ४

तस्तोयकणाद्वातंत्रीकरणाति हे मेघ एवं प्रथमकथितं आखवणानवं गां। गातीरस्थशरवणोद्भातं नवं उत्तरत्र आराध्य पर्युपास्य। किंविशिष्टः उल्
लंघिताध्वा। किंविदतिक्रांतवर्त्मा॥ त्वय्यादातुमित्यादि॥ जलधरं अलिनवल्लमित्तस्यासंतावनयाश्रतिष्ठुवन्नाह। हे मेघ गगनगतः खे
चरांतस्याः चर्मण्वत्याः सिंधोः सरितः पृथुमपि विस्तृतमपि प्रवाहं श्रोतं दूरभावात् विप्रकर्षात् तनुं अल्पमानेन गुणसारूप्यं प्रेक्षिष्यंते द्र
क्ष्यंति किं सवाऽदूरं यथास्यादेवं तथा दृष्टीः दृशः आवर्ज्य प्रसार्य यतो महदपि दवीयदेशाद्विवस्तु स्तोकमिव प्रतिभाति॥ क्व सति त्वयि तत्र वति
जलं तोयं दातुं ग्रहीतुं अवनते लंबमाने सति। किंविशिष्टे त्वयि। सारंगिणः कृष्णस्य वर्णचौरे कांतिमुषि विष्णुनां नीलत्वप्रतीतिः प्रवाहं कि
मिव भुवः पृथिव्याः एकं अद्वितीयं मुक्तागुणमिव मुक्ताकलापमिव हारमिवेति। किंविशिष्टं मुक्तागुणं स्थूलमध्येंद्रनीलं महत् मध्ये इंद्रनीलं म
ध्ये इंद्रनीलं यस्य तं॥ तामुत्तीर्येत्यादि॥ दशपुरगमनेन विलोकनकुतूहलं च पुरतरुणीलोचनगोचरचारित्वं नो धरस्य सुतगताति
मानमारोपयन्नाह॥ हे मेघ तां चर्मण्वतीं नदीं उत्तीर्य अतीत्य व्रज प्रयाहि। त्वं किं कुर्वन्। आत्मबिंबं आत्मीयप्रतिबिंबं दशपुरवधूनेत्रकौतू
हलानां दशपुरं तिथाननगरी लोचनाश्चर्यविलोकितानां पात्रीकुर्वन् विषयतां नयन्। किं॰ लक्षानां दशपुरवधूनेत्रकौतूहलानां। परिचिता
भ्रूलताविभ्रमाणां। परिचितानाम् अभ्यस्ता भ्रूलतानां भ्रूवल्लीनां विभ्रमा वेला शास्ये येषां ते तथाभूतानां। पुनः किंभूतानां। उपरिवि
लसत्कृष्णशारप्रभाणां। उपरि उपरिष्टात् विलसंती स्फुरंती कृष्णसारा कालीं धवलां च अथ च शुक्लेन साराक्षुरा लक्ष्मावदाता प्रभा कांतिर्ये
षां ते तेषां। कस्मात् पक्ष्मोत्क्षेपात्। वर्त्मकिरीटानां पक्ष्मरोमाणां उत्क्षेपः उदंचनं तस्मात्। पुनः किंभूतानां। कुंदक्षेपानुगमधुकरश्रीमुषां। कुंद
स्य कुसुमस्य क्षेपः विक्षेपः तस्य अनुगाः अनुगामिनो मधुकरा मधुलिहः तेषां या शोभा तां मुष्णंति हरंति यानि तेषां येर्यमाण कुंदकुसुम
स्य सारित्वमरविन्नमत्तता मितपर्वः अवधानेन कुंदानाम् अवदातत्वात् अलीनां च लीतत्वात् लोचनानामिदं रूपं संभवति। कथं अप्रस्तुतभांत
द्विलोकनानां सादृश्यं। अत्र क्रियाक्रियावतोरभेदोपचारः वातविसमासि धानेन तद्वत्तनेत्राणि गम्यंते॥ ब्रह्मावर्तमित्यादि॥ पयो
मुचा पविचोह देशादेशः सप्तर्जनेन श्रेयो लाभमुपदिशन्नाह॥ हे मेघ तत। प्रसिद्धं कौरवं कुरूणामिदं कौरवं क्षेत्रं कुरुक्षेत्रं तत्र मेघः आश्र

मेघाः किं विशिष्टं कौरवं क्षेत्रं ब्रह्मावर्त्तं जनपदं सरस्वतीदृषद्वत्योः सरितोः अंतरालवर्त्तिनं के कुर्वन् अधच्छायया अधस्तात् प्रतिबिंबितं
अवगाहयन् गाहमानः आप्लुवन् पुनः किं विशिष्टं कुरुक्षेत्रं क्षत्रप्रधनपिशुनं क्षत्राणां क्षत्रियाणां प्रधनं आयोधनं तस्य पिशुनं सूचकं यत्र यस्मिन्
कुरुक्षेत्रे गांडीवधन्वा अर्जुनः राजन्यानां राज्ञां शितशरशतैः तीक्ष्णबाणैः यकृन्निकरैः मुखानि वदनानि अभ्यषिंचत् अभ्यवर्षत्। गांडीवधन्वा क इव
कमिव यथा त्वं मेघः धारापातैः स्थूलजलबिंदुवर्षैः कमलानि पद्मानि अभिषिंचसि सिंचसे तद्वत्॥ ४९ हित्वा हालेत्यादि॥ अंतो धरस्या वंसि
दये प्रसिद्धतीर्थस्थानं वदन्नाह॥ हे सौम्य त्वमपि त्वं अंतः शुद्धः मध्ये कल्मषरहितः त्वं भवितासि भविष्यसि। किं विशिष्टः त्वं वर्णमात्रेण केवलं
कृष्णः कांत्या कृष्णः कालः किं कृत्वा तासां पवित्रतया सिद्धानां सारस्वतीनां सरस्वतीनदीसंबंधिनीनां सरस्वत्या इमाः सारस्वत्यः तासां तथाविधानां
अपां जलानां अभिगमं संबंधं कृत्वा विधाय याः अपः लांगली बलिभद्रः सिषेवे सेवते। किं कृतो लांगली समरविमुखः संग्रामपराङ्मुखः कया। बं-
धुप्रीत्या बंधूनां संबंधिनी कुरुपांडवानां प्रीत्या स्नेहेन। किं कृत्वा अभिमतरसां अभीष्टस्वादां हालां मदिरां हित्वा त्यक्त्वा। किं कृतां हालां रेवतीलोचनां-
कां प्रियालिनो त्यायतिस्पानलांछनैः नेत्रैः अंकितां चिह्नितां॥ ५० तस्माद्गच्छेरित्यादि॥ हे धन तस्मात् स्थानात् जह्नोः कन्यां जाह्नवीं गंगां गच्छेः व्रजेः
किं कृत्वा अनुकनखलं पथिकनखलं तीर्थं लक्षीकृत्य। किं विशिष्टां जह्नोः कन्यां शैलराजावतीर्णां शैलराजात् अवतीर्णां शैलराजावतीर्णां तां
शैलराजावतीर्णां हिमवतः प्रवृत्तां हिमवतो गंगा प्रवर्त्तते इति श्रुतिः। पुनः कथंभूतां जाह्नवीं सगरतनयस्वर्गसोपानपंक्तिं सगरो नाम नृपतिस्तती
तनयानां षष्टिसहस्रसंख्यानां स्वर्गसोपानपंक्तिः आरोहणश्रेणिः। सगरस्य तनयास्तत्र बातादा। कपिलकोपानलेधनी तत्सुतनयाः पाताले त-
स्मसाज्जाताः भगीरथगंगानीरस्थानीतत्पथगाः प्लावितसमस्ताः कृताः विनाताः त्रिदिवमारुरुहुः पुनः किं कृतां गौरीवक्त्रभ्रुकुटिरच-
नां गौरी गिरिजा तत्पुत्री तस्याः वक्त्रे वदने भ्रुकुटिः कोपावेशात् भ्रूकुटिः कुटिलता तस्याः रचना घटना तां तथाकृतां या गंगा शंभोः ईश्वरस्य केशग्रहणं
अकरोत् विकरधारणं चकार॥ किं कृता या इंदुलग्नोर्मिहस्ता इंदौ चंद्रमसि लग्नाः ऊर्मयः एव हस्ताः यस्याः सा तथाकृता॥ ५१ तस्याः पातुमित्यादि
॥ हे मेघ यदि चेत् त्वं तस्याः गंगायाः अंभः पानीयं पातुं गदाउ तर्कयेः अतिलषेः किं विशिष्टं अंभः अच्छस्फटिकविशदं अच्छस्फटिकवत् निर्मलं। किं
कृतः त्वं पूर्वार्धलंबी पूर्वार्द्धेन अग्रिमतनेन लंबते यः सः पूर्वार्द्धलंबी। वंकः इव त्वमपि प्राग्मैरावणसुरगजः ऐरावण ऐरावतः स्वायः ऐरावणः स्वर्गगंगा

अत्रानुमानालंकारः ४

अत्रोत्प्रेक्षालंकारः ४३

मेघदूतटी०

या: अंतःपातं इव तिष्ठंतं। सा गंगा अस्थाने उपगतयमुना संगमेन अस्थाने प्रयोगव्यतिरिक्तदेशे उपगत उपस्थितो यमुनासंगमः सं
पर्कः स्तेन अदेशांतरप्राप्तस्तेन अभिरामा स्यात्। गंगायाः किं कुर्वंत्याः तव तस्य छायया प्रतिसिंधुवादे संसर्पंत्या प्रसरंत्या। सपदिव
दंत्या॥ ५५ आसीनानामित्यादि॥ हे मेघ त्वं श्रियं शोभां वक्ष्यसि धारयिष्यसि। किंविशिष्टां श्रियं सुत्त्रिनयनवृषोत्खातपंकोपमेयां
सुत्कः स्पष्टः त्रिनयनवृषः उक्षो शृंगेन उत्खातः उत्क्षिप्तः सचासौ पंकः कर्दमः स्तेन उपमीयते तां तथाभूतां। किंकृत्वा तस्याः गंगा
याः प्रभवं उत्पत्तिस्थानं अचलं हिमालयं प्राप्य लब्ध्वा॥ किंविशिष्टं हिमाचलं। तुषारैः हिमैः गौरं शुभ्रं। किंविशिष्टस्त्वं तस्य हिमवतः शृंगे
निरिखिन्नः आसीनः कीदृशे शृंगे। अध्वश्रमविनयने मार्गखेदापनोदके। किंविशिष्टं हिमाचलं। मृगाणां हरिणानां नाभिगंधैः कस्तूरि
कापरिमलैः सुरभितशिलं। आमोदितदृषदं॥ ५५ तं चेद्वायौ सरतीत्यादि॥ हे मेघ त्वं हिमाचलं दवाग्निः वनवह्निः
बाधेत दहेत। किंविशिष्टो दवाग्निः सरलस्कंधसंघट्टजन्मा। सरलानां देवदारूणां वृक्षाणां स्कंधाः शाखाः बंधास्तेषां संघट्टः संघर्षः तस्मा
त् जन्म यस्य स तादृक्। क्व सति वायौ पवने सरति वहति सति। पुनः किंविशिष्टो दवाग्निः उल्काक्षपितचमरीवालभारः उल्का तिरश्चिबद्धा
त्तिः क्षपितो दग्धः चमरीणां आरण्यकगवीनां वालभारः पुच्छकचश्च येन स तादृक्। हे मेघ एनं तादृग्विधं हिमाचलं अलं अत्यर्थम्
वारिधारासहस्रैः त्वं शमयितुं निर्वापयितुं अर्हसि समर्थो भवसि। युक्तोयमर्थः हि सुनिश्चितं यस्मात्कारणात् उत्तमानां महद्
तां संपदः संपत्तयः आपन्नार्तिप्रशमनफलाः भवंति। आपत्त्याः गताः प्राप्ताः आपन्नाः तेषां या आर्तिः पीडा तस्याः प्रशमनं प्रशांतिः तदेव फलं येषां सं
ताः तथोक्ताः॥ ५६ ये संरंभोत्पतनेत्यादि॥ अथ निवार्य विधाय दृष्टांतविधानेन अर्थांतरं संबोधयन्नाह। हे मेघ तस्मिन् पर्वते सरभाः अष्ट
पदाः त्वां तवंतं लंघयेयुः अतिक्रमेयुः। किंविशिष्टाः सरभाः। संरंभोत्पतनरभसाः संरंभेण आटोपेन उत्पतनं संरंभोत्पतनं तस्य रभसो
वेगो येषां ते। कस्मै स्वांगभंगाय निजगात्रभंगार्थं। किंविशिष्टं त्वां। सपदि तत्क्षणमेव मुक्ताध्वानं संत्यक्तपंथानं। तान् सरभान् तुमुल
करकावृष्टिधाराविकीर्णान् कुर्वीथाः तुमुलकरकाणां याः वृष्टिधाराः तेन प्रविकीर्णाः व्याप्ताः ये ते तथाभूताः तान् तथाभूतान् कुर्वीथाः
कुर्वीथा। युक्तोयमर्थः के वा न स्युः केवरूपाः परिभवपदं परिभवस्थानं न स्युः अपि तु सर्वे अपि स्युः। किंभूताः के। निष्फलारंभयत्नाः निष्फ

पाठांतरे तु ये संरंभोत्पतनरभसाः [illegible]

११

लाः फलरहिताः आरंभयत्नाः येषां ते निष्फलारंभयत्नाः ॥५०॥ तत्र व्यक्तमित्यादि ॥ हे मेघ तत्र तस्मिन् हिमालये इंदुमौलेः हरस्य ईश्वरस्य
चरणन्यासं परीयाः प्रदक्षिणी कुर्याः इंदुः चंद्रः मौलिः मुकुटं यस्य स तस्य ॥ किं विशिष्टं चरणन्यासं । दृषदि शिलायां व्यक्तं स्पष्टं । च पुनः किं
भूतं चरणन्यासं । शश्वत् अनवरतं सिद्धैः देवविशेषैः उपहितबलिं दत्तबलिविधानं ॥ यस्मिन् चरणन्यासे दृष्टे अवलोकिते श्रद्दधानाः वास
नावंतः स्थिरगणपदप्राप्तये त्यक्तदेहपापाः अक्षिनिमित्तं कल्पंते । भवंति । किं विशिष्टाः श्रद्दधानाः इदं अत्यर्थं उद्धूतपापाः अत्यंतं नष्टपापाः कस्मा
त् करणविगमात् । करणानि इंद्रियाणि तेषां विनाशात् ॥५०॥ शब्दायंते मधुरेत्यादि ॥ हे मेघ ननु इति वितर्के तत्र तस्मिन् गिरौ पर्वते पशुपतेः रु
द्रस्य समयः संगीतार्थो भावी भविष्यति । प्रेक्षार्थं गीतवाद्यं च संगीतमभिधीयते । संगीतस्य गीतवाद्यस्य नृत्तस्य समुदायार्थः । वेद्य दि
कंदरेषु गुहासु ततवद्ध्वनिः स्यात् तत्र । ध्वनिः क इव मुरज इव । मुरजस्त्विति उच्चैर्वाद्यविशेषः मुरजो मृदंगः शब्दोऽपि निरूपचारात् मुरज उच्यते
किंभूतो मुरजः निह्रादी गंभीरः कीचकाः सछिद्रवंशाः अनिलैः पवनैः पूर्यमाणाः पूर्यमाणाः मधुरं सस्वरं [illegible] यथा स्यादेवं तथा शब्दा
यंते शब्दं कुर्वंति । उत्के स्ते किंनरीभिः किंनरस्त्रीभिः संरक्ताभिः रक्तवतीभिः त्रिपुरविजयः दाहरस्तावत् गीयते गीते न उपलभ्यते ॥५०॥ प्रा
लेयाद्रेरुपतटेत्यादि ॥ उत्तराशां प्रति वारितगमनोपायं पयोदस्योपदिशन्नाह ॥ हे मेघ तेन मार्गेण उदीचीं उत्तरां दिशं अनुसरेः गच्छेः किं
विशिष्टः त्वं तिर्यगायामशोभी ॥ तिर्यक् स्थान आयामो विस्तारः तेन शोभत इति । तेन तुरुक केन मार्गेण इत्यादि ॥ यत्क्रौंचरंध्रं ध्वंसे
ते क्रौंचनाम्नः ऋषेः रंध्रं वा तत्स्थानं यत्तत् । तेन पथा उत्तराशां गच्छेः इत्यर्थः । किं विशिष्टं क्रौंचरंध्रं भृगुपतियशोवर्त्म । परशुरामः यस्मि
न्मसरत् सरणिः शरा किल तेन स गिरिः शरैः दारितः पुनः कथंभूतं क्रौंचरंध्रं हंसद्वारं । नाम हंसानां मानससरो अनुसरतां द्वारं निर्गमोपा
यं । किं त्व वामनहरिपादतां स विशेषान् उत्कर्षपान् अतिक्रम्य उल्लंघ्य प्रालेयाद्रेः तुषाराद्रेः उपतटं तटसमीपं । किं विशिष्टः त्वं श्यामः कृष्णः क
इव विष्णोर्नारायणस्य पाद इव चरण उत्थितः कृष्णपाद इव । शब्दोऽत्र तुल्यवाचकः ॥ किं विशिष्टस्य विष्णोः बलिनियमनाभ्युद्यतस्य । बलेर्दैत्यराजस्य
नियमनं नियंत्रणं तत्रोद्यतस्य । इतोऽमस्या ॥६०॥ गत्वा चोर्ध्वमित्यादि ॥ हे मेघ कैलासस्य स्फटिकगिरेः पर्वतस्य अतिथिः प्राघूर्णकः स्याः त्वं

किंविशिष्टस्य कैलासस्य। त्रिदशवनितादर्पणस्य। अमरनारीदर्पणस्य। मुकुरस्य। पुनः किंभूतस्य कैलासस्य। दशमुखभुजोच्छ्वासितप्र
स्थसंधेः। दशवदनदोः पटलैः विघटिततटबंधस्य। किंभूतः। ऊर्ध्वं उपरि गत्वा यायाः। यः पर्वतः स्वर्गारोहाय शिखरप्राग्भारैः खं आकाशं
वितत्य। व्याप्य स्थितः। तत्कैलासस्य कस्येव। त्र्यंबकस्य हरस्य प्रतिदिनं दिनं प्रति उच्चैरट्टहासः। उच्चैः अट्टहासस्य इव। यथा अट्टहासः
दिशो व्याप्य तिष्ठति तद्वत्। किंभूतो हासः। राशीभूतः। पुंजीभूतः। त्र्यंबकस्य त्रीणि नेत्राणि यस्य स त्र्यंबकः॥ ६२ उत्पश्यामीत्यादि॥ हे मेघ
तस्य कैलासस्य अद्रेः गिरेः शोभां कांतिं त्वयि अवलोकनयोग्यां
अतिरम्यां तत उत्पश्यामि। उत्प्रेक्षे। कस्मिन् सति त्वयि तत्र तटगते सति। तटप्राप्ते सति। किंविशिष्टे त्वयि। स्निग्धभिन्नांजनाभे। स्निग्धेन तत्र
देनयत्तस्मिन्नंजनं तदाभे तत्सदृशे। किंविशिष्टस्य तस्य अद्रेः सद्यः सीघ्रं कृत्तद्विरददशनच्छेदगौरस्य। कृत्तश्छिन्नः यो द्विरददशनस्तस्य
छेदस्तद्वत् गौरस्य। तस्याद्रेः कस्येव। हलभृतो बलभद्रस्येव। यथा बलिभद्रस्य मेचकेन नीलेन वाससि वस्त्रे सति शोभा समुत्पद्यते तद्वत्
किंभूते वस्त्रे। अंसन्यस्ते। स्कंधस्थे॥ ६२ तस्मिन् हित्वा भुजगेत्यादि॥ हे मेघ त्वं यदि चेत् तत्र तस्मिन् कैलाशे क्रीडाशैले क्रीडापर्वते
गौरी पार्वती पादचारेण चरणचारेण विचरेत् विचरति। किंविशिष्टा गौरी। शंभुना हरेण दत्तहस्ता। अवलंबनाय अर्पितकरा। किंकृ
त्वा भुजगवलयं फणिकंकणं हित्वा त्यक्त्वा। किंविशिष्टः त्वं स्तंभितांतर्जलौघः निरचितवपुः मनो इच्छाकारेण विरचितवपुः कृतशरीरः पु
नः किंभूतः त्वं स्तंभितांतर्जलौघः स्तंभितः स्तंभितो अंतर्जलौघः जलप्रवाहो येन स तादृक्। हे मेघ अग्रयायी अग्रेसरः
सन् आरोहणाय आरोहणार्थं मणितटारोहणाय मणिमयशिलारूपं सोपानं पदिकाबंधं कुरु विधेहि॥ ६३ तत्रावश्यमित्यादि॥ हे मेघ त
त्र तस्मिन् पर्वते अवश्यं निश्चितं सुरयुवतयः त्रिदशानां स्त्रियः त्वां तत्र धारागृहत्वं यंत्रधारागृहतां नेष्यंति प्रापयिष्यंति। किंविशिष्टं त्वां। कुलिशवलयोद्घट्टनोद्गीर्णतोयं वलयेषु कटकेषु यानि कुलि
शानि वज्राणि तेषां घट्टनेन उद्गीर्णं वांतं तोयं येन स तं। ... तां हे सखे मित्र यदि ता न दास्यंति तदा सवदःतास्सुर

॥ लिंगानुशासनवाचिक कलिकोलाहलानुसिनि ॥

मेघदूतस्यटीका

लेखनकाल—

१५१३ वि० =५२२